# Gokarneshamishvaram Shiva Stuti by Munis and Dakshinamurtirupa Prakatyam

# મુનિભિઃ કૃતા ગોકર્ણેશમીશ્વરંશિવસ્તુતિરેવં દક્ષિણામૂર્તિરૂપસ્ય પ્રાકટ્યમ્

## Document Information

Text title : Gokarneshamishvaram Shiva Stuti by Munis and Dakshinamurtirupa Prakatyam

File name : gokarNeshamIshvaraMshivastutirevaMdakShiNAmUrtirUpasyaprAkaTyammunibhiHkRRitA.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 25||

Latest update : September 15, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 15, 2023

*sanskritdocuments.org*

# Gokarneshamishvaram Shiva Stuti by Munis and Dakshinamurtirupa Prakatyam

# મુનિભિઃ કૃતા ગોકર્ણેશમીશ્વરંશિવસ્તુતિરેવં દક્ષિણામૂર્તિરૂપસ્ય પ્રાકટ્યમ્

(શિવગૌરીસંવાદે)

ઈશ્વરઃ -

વસિષ્ઠાદ્યાશ્ચ મુનયો વામદેવાદિયોગિનઃ ।
વિશ્વામિત્રોઽઙ્ગિરાત્રિશ્ચ ભરદ્વાજોઽથ ગૌતમઃ ॥ ૧॥ (અઙ્ગિરાશ્ચૈવ)

વ્યાસઃ પરાશરો ધૌમ્યઃ ઉચથ્યો ભાર્ગવો મુનિઃ ।
સુમન્તુર્જૈમિનિઃ પૈલઃ કહોલો જમદગ્નિજઃ ॥ ૨॥

જૈગીષવ્યઃ શ્વેતકેતુર્મન્યુશ્ચૈવ મહામુનિઃ ।
દુર્વાસોદ્દાલકો યોગી સનાતનસનન્દનૌ ॥ ૩॥

સનત્સુજાતઃ સનકઃ તથા ભૃઙ્ગિરિટિર્મુનિઃ ।
ઉદ્દાલકો હરીતશ્ચ દત્તાત્રેયોઽથ કશ્યપઃ ॥ ૪॥

મઙ્કણઃ શકણો દાલ્ભ્યઃ શૌનકસ્તણ્ડવઃ કૃશઃ ।
કાશકૃત્સ્નશ્ચૌડુલોમિઃ શિલાદઃ પૈપ્પલાયનઃ ॥ ૫॥

બોધાયનો મરીચશ્ચ તથા ચૈવાશ્વલાયનઃ ।
એતે ચાન્યે ચ મુનયો વેદવેદાન્તપારગાઃ ॥ ૬॥

ભાષ્યાણિ ધર્મશાસ્ત્રાણિ કલ્પસૂત્રાણિ સત્તમે ।
કૃત્વાઽપિ સંશયાપન્ના માં ગોકર્ણેશમીશ્વરમ્ ॥ ૭॥

સંશયોચ્છેદનં જ્ઞાનં મત્તો લબ્ધું મુનીશ્વરાઃ ।
તપસ્યન્તિ મહાભાગે શુદ્ધ્યર્થં તપસઃ શિવે ॥ ૮॥

શુદ્ધે મનસિ ચ જ્ઞાનં પ્રતિબિમ્બતિ નાન્યથા ।
પઞ્ચાગ્નિનિરતાશ્ચાન્યે કટધૃમાશનાઃ પરે ॥ ૯॥

પર્ણાશિનસ્તથા કેચિદ્વાયુવારિફલાશનાઃ ।
નિરાહારાસ્તથા કેચિત્કેચિત્પક્ષોપવાસિનઃ ॥ ૧૦॥

કૃચ્છ્રાણિ કેચિત્કુર્વન્તિ વિવિધાનિ સદાશિવે ।
ગૃહસ્થા યતયઃ કેચિદ્વાનપ્રસ્થાશ્ચ વર્ણિનઃ ॥ ૧૧॥

જટાજિનધરા મુણ્ડા ભસ્મરુદ્રાક્ષભૂષણાઃ ।
અગ્નિરિત્યાદિભિર્મન્ત્રૈઃ સર્વાઙ્ગોદ્ધૂલને રતાઃ ॥ ૧૨॥

ત્રિપુણ્ડ્રરેખાવિલસદ્ભાલભાગમનોહરાઃ ।
કૌપીનાચ્છાદનૈર્હીનાઃ કેચિત્કૌપીનધારિણઃ ॥ ૧૩॥

અશ્મકુટ્ટાસ્તથા કેચિદ્દન્તોલૂખલિનસ્તથા ।
ગોચર્મવસનાઃ કેચિત્કેચિદ્વ્યાઘ્રાજિનામ્બરાઃ ॥ ૧૪॥

અલાબુવૈણવાદીનિ વાક્ષ્યશ્રૃઙ્ગાદિપાત્રકૈઃ । (વાર્ક્ષાસ્યાદિકપાત્રકૈઃ)
પ્રાણયાત્રાં પ્રકુર્વન્તિ મન્નૈવેદ્યૈકભોજિનઃ ॥ ૧૫॥

અયાચિતાસ્તથા કેચિત્સપ્તાગારચરાઃ પરે ।
મન્નામનિરતાઃ સર્વે મમ લિઙ્ગાર્ચનપ્રિયાઃ ॥ ૧૬॥

પઞ્ચાક્ષરજપાસક્તાઃ કેચિત્પ્રણવજાપકાઃ ।
ભસ્મનિષ્ઠાભસ્મશય્યારુદ્રાધ્યાયજપાદરાઃ ॥ ૧૭॥

લિઙ્ગાર્ચનપરાઃ કેચિદ્બિલ્વપત્રાદિસાધનૈઃ ।
કેચિલ્લિઙ્ગે નીરધારાં કલ્પયિત્વા ચ સંસ્થિતાઃ ॥ ૧૮॥

રુદ્રાધ્યાયાવર્તનૈસ્તે કાલકાલાર્ચને રતાઃ ।
બિલ્વમૂલેષુ લિઙ્ગાનિ પૂજયન્ત્યથ કેચન ॥ ૧૯॥

શિવ શમ્ભો મહાદેવ પ્રસીદેતિ વદન્તિ ચ ।
સ્થાનાસનાદિભિઃ કેચિત્કેચિદ્વ્યૂર્ધ્વબાહવઃ ॥ ૨૦॥

ગ્રીષ્મે ઘર્માંશુસન્તપ્તાઃ વર્ષાસ્વાકાશગોચરાઃ ।
શિવશબ્દજપધ્વસ્તપાપપઞ્જરસુન્દરાઃ ॥ ૨૧॥

ગોકર્ણનિલયં માં હિ ધ્યાયન્તો લિઙ્ગરૂપિણમ્ ।
એવં સંવસતાં તેષાં જ્ઞાનં દાતું મહેશ્વરિ ॥ ૨૨॥

તેષાં પુરઃ પ્રાદુરાસં નીલકણ્ઠોઽમ્બિકાયુતઃ ।
માં દૃષ્ટ્વા તે મુનિગણાઃ પ્રણમ્ય ભુવિ દણ્ડવત્ ॥ ૨૩॥

તુષ્ટુવુર્જયશબ્દૈશ્ચ ગોકર્ણેશં મુનીશ્વરાઃ ।

—

મુનયઃ -

જય દેવ વિરૂપાક્ષ જય ભક્તાર્તિભઞ્જન ।
જયાનન્ત મહાદેવ જય વિશ્વાધિક પ્રભો ॥ ૨૪॥

જયામરેશઽસર્વેશ જય પ્રમથનાયક ।
જય શાશ્વત સર્વજ્ઞ જય લિઙ્ગાર્ચકપ્રિય ॥ ૨૫॥

જય કાલકલાતીત જય શમ્ભો મહેશ્વર ।
જય શિષ્ટજનપ્રીત જય શ્રીકણ્ઠ શાશ્વત ॥ ૨૬॥

જયોગ્ર ભીમ કામારે જય લિઙ્ગસ્થ શઙ્કર ।
જય ગઙ્ગાધરાવ્યગ્ર જય ચન્દ્રકલાધર ॥ ૨૭॥

જય બિલ્વદળપ્રીત જય ભીમ પ્રસીદ નઃ ॥ ૨૮॥

ત્વં બ્રાહ્મણઃ સર્વસુરૈર્વિશિષ્ટઃ શિષ્ટેષ્ટપૂજ્યો ભગવન્શ્રુતિશ્રુતઃ ।
વયં મનુષ્યપ્રવરા હિ વિપ્રાસ્ત્વામાશ્રયામોઽખિલબન્ધમુક્ત્યૈ ॥ ૨૯॥

સુખાભાસૈર્ધર્મૈર્જનિમૃતિનિદાનાદિનિવહૈરવિદ્યાં તીર્ત્વૈવ પ્રતિભવશતેષૂત્તમધિયઃ ।
અસારં સંસારં નિરવધિકકષ્ટૈકજનકં મુહુર્નિન્દ્યં શમ્ભો વિધિરહિતબુદ્ધ્યા ગતધિયઃ ॥ ૩૦॥

લુઠન્તો મોહાન્ધાઃ ફલજનિતકામાઃ સુખમયે તથા સ્વર્ગે દુઃખે નરકશતવૈચિત્ર્યનિવહે ।
મહેશં વિશ્વેશમખિલહૃદયાબ્જૈકવસતિં ન જાનન્તો મોહાદ્ભવદભયભક્ત્યા વિરહિતાઃ ॥ ૩૧॥

—

ઈશ્વરઃ -

ઇત્થં સંસ્તુત્ય તે સર્વે જયસ્તુત્યા તદામ્બિકે ।
સંસારજનકાજ્ઞાનનિવર્તનકરં તદા ॥ ૩૨॥

વિજ્ઞાનં માં તદા પ્રોચુર્દેહેતિ પરમેશ્વરિ ॥

—

મુનયઃ -

પશુપાશવિમોચકો ભવાન્પશવોઽજ્ઞાનવિજૃમ્ભિતા વયમ્ ।
ભગવઞ્શરણાગતાનથાસ્માઞ્છિવ તદ્વદ ગુહ્યમપિ પ્રભો મુદા ॥ ૩૩॥

ભવપાશવિમુક્તયે પદં મનસઃ પારમતીવ સૌખ્યદમ્ ।
યદિ ત્વત્કરુણાકટાક્ષલેશૈઃ ભવદીયૈરભવાય જાયતે ॥ ૩૪॥

ભવસાગરતારકં વયં તે પદપદ્મં પ્રથમં સમાશ્રિતાઃ ।
વદ તન્નો દુરવાપ્યમપ્યવામું શ્રુતિવર્યૈર્નિખિલં વિમુક્તિદાયિન્ ॥ ૩૫॥

અતિતુચ્છમનોવિલાસિતૈઃ પ્રથમાનૈર્જનનાદિદુઃખદૈઃ ।
વિભવૈરસુખાય કલ્પિતૈઃ સુખબુદ્ધ્યૈવ ભ્રમન્તિ પામરાઃ ॥ ૩૬॥

દારાપત્યધનૈશ્ચ ધાન્યનિકરૈઃ સદ્ધેમપટ્ટામ્બરૈ-
    રશ્વૈર્ગોમહિષૈરજાવિકગણૈર્દન્ત્યુત્તમૈઃ સ્યન્દનૈઃ ।
પ્રાસાદૈર્વિવિધૈર્મહોન્નતતલૈર્મઞ્ચૈઃ પરાર્ધ્યાસ્તૃતૈઃ
    નાનારત્નવરાદિભૂષણગણૈરાજ્યૈર્વિમોહસ્યહો ॥ ૩૭॥

—

ઈશ્વરઃ -
એવં પ્રાર્થયતાં તેષાં મુનીનાં ભાવિતાત્મનામ્ ।
તાનબ્રવમહં ગૌરિ તદ્જ્ઞાનં પરમેશ્વરિ ॥ ૩૮॥

તલ્લિઙ્ગદક્ષિણાદ્વક્ત્રાદઘોરાન્મૂર્તિમાન્સ્થિતઃ ।
તાન્મુનીનુપદેષ્ટું તદ્જ્ઞાનં પરમમમ્બિકે ॥ ૩૯॥

પિશઙ્ગિતજટાકુટીવિધૃતચન્દ્રગઙ્ગાનલોજ્જ્વલન્નિટિલલોચનં વટતરોરધસ્તાત્સ્થિતમ્ ।
કટીતટમૃગાજિનં કૃતસુયોગપટ્ટોલ્લસત્કરામ્બુજમુમાસખં ગરલનીલકણ્ઠં શિવમ્ ॥ ૪૦॥

અપસ્મૃતિશિરઃસ્થિતપ્રકટપાદફુલ્લામ્બુજં વિનિદ્રઘુસૃણારુણોત્પલકરોત્થચિન્મુદ્રિકમ્ ।
સુરાસુરમુનિવ્રજભ્રમદહાર્દવિધ્વંસનં તમોગુણગણારુણપ્રભુવિદીપ્તિવિદ્યોતકમ્ ॥ ૪૧॥

માં તાદૃશં તદા દેવિ દક્ષિણામૂર્તિરૂપિણમ્ ।
સ્વાજ્ઞાનવિનિવૃત્ત્યર્થં તુષ્ટુવુર્મુનયોઽમલાઃ ॥ ૪૨॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવગૌરીસંવાદે મુનિભિઃ કૃતા ગોકર્ણેશમીશ્વરં શિવસ્તુતિરેવં દક્ષિણામૂર્તિરૂપસ્ય પ્રાકટ્યમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભર્ગાખ્યઃ પઞ્ચમાંશઃ । અધ્યાયઃ ૨૫॥

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 25..

Notes:

Muni-s of the order of Vasishtha, Vamadeva, Vishwamitra, Angira, Bhardwaja, Gautama, Vyasa, Parashara et al; despite being well versed in Veda etc. shastras, worship Gokarnesham-Ishwara Shiva and perform austerities in search of ShivaGyana at Gokarna with much fervour and intensity. The Muni-s present to Shiva that they have been swaying in the ignorance like Pashu and pray that He grants them liberation from the Bhava-Pasha. As Shiva accepted their prayers; Aghora-mukha - the Southern face of the ShivaLinga, manifests in form of Dakshinamurty in order to satiate their quest.
The verses pertaining to Gyanopadesha by Dakshinamurty Shiva, follow in the same Chapter.

The shloka numbers have been maintained per the source text.

Proofread by Ruma Dewan

---

*Gokarneshamishvaram Shiva Stuti by Munis and Dakshinamurtirupa Prakatyam*
pdf was typeset on September 15, 2023

Please send corrections to *sanskrit@cheerful.com*